विगाहमानः, त्रि, ( वि+गाह+शानच् ।) विलोड़नकर्त्ता । अवगाहनकर्त्ता । विपूर्ब्बगाहधातोः शानप्रत्ययेन निष्पन्नः ॥ ( यथा, रघुः । १३ । १ ।
"अथात्मनः शब्दगुणं गुणज्ञः
पदं विमानेन विगाहमानः ।
रत्नाकरं वीक्ष्य मिथः स जायां
रामाभिधानो हरिरित्युवाच ॥")

विगुणः, त्रि, ( विपरीतो गुणो यस्य । ) गुणवैपरीत्यविशिष्टः । यथा,—
"यथा मनो ममाचष्ट नेयं माता तथा मम ।
विगुणेष्वपि पुत्त्रेषु न माता विगुणा भवेत् ॥"
इति मार्कण्डेयपुराणे वैवस्वतमन्वन्तराध्यायः ॥
( सूक्ष्मः । यथा, भागवते । ७ । ९ । ४८ ।
"सर्व्वं त्वमेव सगुणो विगुणश्च भूमन्
नान्यत् त्वदस्त्यपि मनो वचसा निरुक्तम् ॥"
गुणहीनः । यथा, शिशुपालवधे । ९ । १२ ।
"अवसन्नतापमतमिस्रमभा-
दपदोषतेव विगुणस्य गुणः ॥")

विगूढः, त्रि, ( विशेषेण गूढः । ) गर्हितः । गुप्तः । इति मेदिनी । ढ़े, ९—१० ॥

विग्रः, त्रि, ( विगता नासिकास्य । "वेर्ग्रो वक्तव्यः ।" ८ । ४ । २८ । इत्यस्य वार्त्तिकोक्त्या नासिकायाः ग्रः ।) गतनासिकः । इत्यमरः ॥*॥ (त्रि,"विविधं गृह्णात्यर्थानिति विपूर्ब्बात् गृह्णातेः 'अन्येष्वपि दृश्यते ।' इति डः ।" इति देवराजयज्वा । मेधावी । इति निघण्टुः । ३ ।१५॥ यथा, ऋग्वेदे । १ । ४ । ४ ।
"परेहि विग्रमस्तृतमिन्द्रं पृच्छाविपश्चितम् ॥")

विग्रहः, पुं, ( विविधं सुखदुःखादिकं गृह्णातीति । वि+ग्रह+अच् । यद्वा, विविधैर्दुःखादिभिर्गृह्यते इति । वि+ग्रह+"ग्रहवृदृनिश्चिगमश्च ।"३ । ३ । ५८ । इति अप् ।) शरीरम् । ( यथा, रघुः । ११ । १३ ।
"विग्रहेण मदनस्य चारुणा
सोऽभवत् प्रतिनिधिर्न कर्म्मणा ॥")
युद्धम् । इत्यमरः ॥ ( यथा, मनुः । ७ । १६० ।
"सन्धिञ्च विग्रहञ्चैव यानमासनमेव च ।
द्वैधीभावं संश्रयञ्च षड्गुणांश्चिन्तयेत् सदा ॥"
विरोधमात्रम् । यथा, रघुः । ९ । ४७ ।
"त्यजत मानमलं बत विग्रहै-
र्न पुनरेति गतं चतुरं वयः ।
परभृताभिरितीव निवेदिते
स्मरमते रमते स्म वधूजनः ॥")
विभागः । इति मेदिनी । हे, २३ ॥ ( यथा, भागवते । ३ । ३१ । ३ ।
"मासेन तु शिरो द्वाभ्यां बाह्वङ्घ्र्याद्यङ्ग-
विग्रहः ।
नखलोमास्थिचर्म्माणि लिङ्गच्छिद्रोद्भव-
स्त्रिभिः ॥" )
वाक्यभेदः । स तु समासवाक्यम् । तत्पर्य्यायः । विस्तरः २ । इत्यमरः ॥ ( वीनां पक्षिणां ग्रहो ग्रहणमिति वाक्ये विहङ्गग्रहणम् । यथा, वक्रोक्तिपञ्चाशिकायाम् । ४ ।
"नो सन्ध्या हितमत्सरा तव तनौ वत्स्याम्यहं
सन्धिना
न प्रीतास्मि वरोरु चेत्कथय तत् प्रस्तौमि किं
विग्रहम् ।
कार्य्यं तेन न किञ्चिदस्ति शठ मे वीनां ग्रहे-
णेति वो
दिश्यासुः प्रतिबद्धकेलिशिवयोः श्रेयांसि
वक्रोक्तयः ॥" )
देवविग्रहकरणादिप्रमाणं श्रीमूर्त्तिशब्दे द्रष्टव्यम्॥

विग्रहः, पुं स्त्री, ( विगृह्यन्ते शत्रवो यस्मिन् । वि+ग्रह+अप् ।) युद्धम् । इत्यमरः ॥ (यथा, मनुः । ७ । १७० ।
"यदा प्रहृष्टा मन्येत सर्व्वास्ताः प्रकृतीर्भृशम् ।
अत्युच्छ्रितं तथात्मानं तदा कुर्व्वीत विग्रहम् ॥")

विग्रहावरं, क्ली, ( विग्रहमावृणोतीति । आ+वृ+अच् । ) पृष्ठम् । इति शब्दचन्द्रिका ॥

विघटिका, स्त्री, ( विभक्ता घटिका यया । ) पलम् । इति राजनिर्घण्टः ॥

विघट्टितं, त्रि, विशेषेण चालितम् । विपूर्ब्बघट्टधातोः क्तप्रत्ययेन निष्पन्नम् ॥ ( यथा, बृहत्संहितायाम् । ३५ । १ ।
"सूर्य्यस्य विविधवर्णाः पवनेन विघट्टिताः कराः
साभ्रे ।
वियति धनुःसंस्थाना ये दृश्यन्ते तदिन्द्रधनुः ॥"
विद्धम् । यथा, माघे । ८ । २४ ।
"त्रस्यन्ती चलशफरीविघट्टितोरू-
र्वामोरूरतिशयमाप विभ्रमस्य ॥" )

विघसं, क्ली, ( विशेषेण अद्यते इति । वि+अद+"उपसर्गेऽदः ।" ३ । ३ । ५९ । इति अप् । "घञपोश्च ।" २ । ४ । ३८ । इति घस्लृ-आदेशः । ) सिक्थकम् । इति राजनिर्घण्टः ॥

विघसः, पुं, ( वि+अद+अप् । ) भोजनशेषः । इत्यमरः ॥ देवपितृतिथिगुर्व्वादिभुक्तस्य शेषः । इति भरतः ॥ (यथा, मनुः । ३ । २८५ ।
"विघसाशी भवेन्नित्यं नित्यं वाऽमृतभोजनः ।
विघसो भुक्तशेषन्तु यज्ञशेषं तथाऽमृतम् ॥" )
आहारः । इति शब्दरत्नावली ॥ ( यथा,—
"अयि वनप्रिय ! विस्मृत एव किं
बलिभुजो विघसो भवताधुना ।
यदनयैव कुहूरिति विद्यया
न पततश्चरणौ धरणौ तव ॥"
इत्युद्भटः ॥ )

विघातः, पुं, ( विशेषेण हननमिति । वि+हन+घञ् ।) व्याघातः । यथा, अमरे ।
"दृष्टिर्वैषं तद्विघातेऽव्याहावग्रहौ समौ ॥"
आघातः । ( यथा, महाभारते ।
"चक्रे शरविघातञ्च क्रीड़न्निव पितामहः ॥"
विनाशः । यथा महाभारते । १ । २९ । १३ ।
"क्षुत्पिपासाविघातार्थं भक्ष्यमाख्यातु मे
भवान् ॥")

विघाती, [न्] त्रि, निवारकः । घातकः । विघातशब्दादिन्प्रत्ययेन विपूर्ब्बहनधातोर्ग्रहादित्वात् णिनिप्रत्ययेन वा निष्पन्नः ॥ ( यथा, हरिवंशे । ८७ । ४५ ।
"एवमूर्ज्जितवीर्य्यस्य ममामरविघातिनः ॥")

विघ्नः, पुं, ( विहन्यते अनेनेति । वि+हन+"घञर्थे कविधानम् ।" ३ । ३ । ५८ । इत्यस्य वार्त्तिकोक्त्या कः । ) व्याघातः । तत्पर्य्यायः । अन्तरायः २ प्रत्यूहः ३ । इत्यमरः ॥ ( यथा मुद्राराक्षसे । २ ।
"प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्ननिहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमाना
प्रारब्धमुत्तमगुणास्त्वमिवोद्वहन्ति ॥"
कृष्णपाकफला । इति शब्दचन्द्रिका ॥ शेषार्थे अमरे अविघ्न इति पाठः ॥

विघ्नकारी, [ न् ] त्रि, (विघ्नं कर्त्तुं शीलमस्येति । कृ+णिनिः । ) घोरदर्शनः । विघाती । इति मेदिनी । ने, २५५ ॥

विघ्ननायकः, पुं, ( विघ्नानां नायकः विघ्नाधीश्वरत्वात् । ) गणेशः । इति शब्दरत्नावली ॥

विघ्ननाशकः, पुं, ( विघ्नानां नाशकः । ) गणेशः । इति शब्दरत्नावली ॥

विघ्ननाशनः, पुं, ( नाशयतीति नाशनः विघ्नानां नाशनः ।) गणेशः । इति शब्दरत्नावली ॥

विघ्नराजः, पुं, ( विघ्नानां राजा । "राजाहःसखिभ्यष्टच् ।" ५।४।९१ । इति टच् ।) गणेशः । इत्यमरः ॥ ( यथा, कथासरित्सागरे ।२०।१०१।
"आर्य्यपुत्त्र पुरा गत्वा विघ्नराजमपूजयत् ॥")

विघ्नविनायकः, पुं, (विघ्नानां विनायकः ।) गणेशः । इति काशीखण्डः ॥

विघ्नहारी, [न्] पुं, (विघ्नं हर्त्तुं शीलमस्य इति । हृ+णिनिः । ) गणेशः । इति त्रिकाण्डशेषः ॥ विघ्ननाशके, त्रि ॥

विघ्नितः, त्रि, जातविघ्नः । विघ्नोऽस्य जात इत्यर्थे विघ्नशब्दादितच्प्रत्ययेन निष्पन्नः ॥

विघ्नेशः, पुं, (विघ्नानां ईशः ।) गणेशः । इति शब्दरत्नावली ॥ (यथा कथासरित्सागरे ।२०।८३।
"विघ्नोऽत्र तव जातोऽयं विना विघ्नेशपूज-
नम् ॥" )

विघ्नेशवाहनः, पुं, ( विघ्नेशस्य वाहनः । ) महामूषकः । इति राजनिर्घण्टः ॥

विघ्नेशानकान्ता, स्त्री, ( विघ्नेशानस्य गणेशस्य कान्ता प्रिया । तत् पूजायां एतस्याः प्राशस्त्यात् । श्वेतदूर्व्वा । इति राजनिर्घण्टः ॥

विङ्कः पुं, अश्वखुरः । इति त्रिकाण्डशेषः ॥

विच, इर् लि ध औ ञ पृथक्कृतौ । इति कविकल्पद्रुमः ॥ ( अदा०-ह्वा०-रुधा०-च-उभ०-अक०-सक०-अनिट् । ) इर्, अविचत् । अवैक्षीत् । लि, ञ, वेवेक्ति वेविक्ते मूर्खात् पण्डितः पृथक् स्यादित्यर्थः । विज इति जान्तो यः स एव चान्तोऽपि पठ्यते कस्यचिदनुरोधात्